२२
लघु
अथ यमस्मृति आरंभः पत्रे ३

म.

श्रीगणेशायनमः श्रुतिस्मृत्युदितंधर्मं वर्णानामनुपूर्वशः प्राब्रवीदृषिभिःपृष्टोमुनीनामग्रणीर्यमः १ योभुंजानोऽशु
चिर्वापि चांडालंपतितंस्पृशेत् क्रोधतोऽज्ञानतोवापितस्यवक्ष्यामिनिष्कृतं त्रिरात्रंवाषड्रात्रंयथासंख्यंसमाचरेत्
स्नानंत्रिषवणंविप्रः पंचगव्येनशुद्ध्यति भुंजानस्यतुविप्रस्यकदाचित्स्रवतेगुदं उच्छिष्टत्वेऽशुचित्वेचतस्यशौ
चंविनिर्दिशेत् पूर्वंकृत्वाद्विजःशौचंपश्चादपउपस्पृशेत् अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यति ५ निगिरन्यदि
मेहेन भुंक्तेवामेहनेकृते अहोरात्रोषितोभूत्वाजुहुयात्सर्पिषाहुतीः ८ यदाभोजनकालेस्यादशुचिर्ब्राह्मणःक्वचित्
भूमौनिधायतंग्रासंस्नात्वाशुद्धिमवाप्नुयात् भक्षयित्वातुतंग्रासमुपवासेनशुद्ध्यति अशित्वाचैवतत्सर्वंत्रिरात्रम
शुचिर्भवेत् अश्नतश्चेद्विरेकःस्यात्दुःस्वस्यस्त्रिशतंजपेत् सुस्थस्त्रीणिसहस्राणिगायत्र्याःसाधनंपरं चांडालश्व
पचैःस्पृष्टोविण्मूत्रेतुकृतेद्विजः त्रिरात्रंसंप्रकुर्वीतभुक्तोच्छिष्टेषडाचरेत् १० उदक्यांसूतकांचैवापिसंस्पृशेदन्त्यजोय
दि त्रिरात्रेणविशुद्धिःस्यादितिशातातपोऽब्रवीत् रजस्वलातुसंस्पृष्टाश्वमातंगादिवायसैः निराहाराशुचिस्तिष्ठेत्का
लेस्नात्वाविशुद्ध्यति रजस्वलेयदाभार्येअन्योन्यंस्पृशतःक्वचित् शुद्ध्यतःपंचगव्येनब्रह्मकूर्चेनचोपरि उच्छिष्टे
नतुसंस्पृष्टाकदाचित्स्त्रीरजस्वला कृच्छ्रेणशुद्धिमाप्नोतिशूद्रादानोपवासतः उच्छिष्टेनतुसंस्पृष्टःस्नानंयेनविधीयते
तेनैवोच्छिष्टसंपृष्टःप्राजापत्यंसमाचरेत् १५ अतोतुगर्भशंकित्वात्स्नानंमैथुनिनःस्मृतं अनृतौतुस्त्रियंगत्वाशौ
चंमूत्रपुरीषवत् दंड्याद्वादशकंनारीऋत्विजःकारणंविना त्यजंतोपतितान्बंधून्दंड्याउत्तमसाहसं पिताहिपतितःका
मंनतुमाताकदाचन आत्मानंघातयेद्यस्तुरज्ज्वादिभिरुपक्रमेः मृतोमेध्येनलेप्तव्योजीवतोद्विशतंदमः दंड्यास्तन्मित्रपु

श्रीराम

१

आश्वप्रत्येकेशातिकेदमं प्रायश्चित्तंततः कुर्याद्यथाशास्त्रप्रचोदितं जलाग्निवंधनेभ्रष्टाप्रव्रज्यानाशनच्युताः २०
विषप्रतपनप्रायः शस्त्रघातहताश्चये दशैतेप्रत्यवसिताः सर्वलोवहिः कृताः चांद्रायणेनशुद्ध्यंतिनप्तकृच्छ्रद्वयेनच
उभयावासिताः पापायेप्यागमवलच्युताः चांद्रायणेनशुद्ध्यंतिधेनुंदत्वानप्यावृषं श्वशृगालहयाद्यैस्तुमानुषेश्चर
तंविना दष्टः स्नात्वा शुचिः सद्योदिवासंध्यासुरात्रिषु अज्ञानात्ब्राह्मणोभुक्त्वाचांडालान्नंकथंचन गोमूत्रयावका
हारेमासार्द्धेनविशुद्ध्यति गोब्राह्मणहतंदग्ध्वामृतंवाचंधनादिना पाशंछित्वातथाचास्यकृच्छ्रमेकंद्विजश्चरेत् चांडालयुक्त
ल्योसानांचभुक्त्वागत्वाचयोषितः २९ कृच्छ्राब्दमाचरेत्ज्ञानादज्ञानादैन्दवद्वयं अगम्यागमनेविप्रोमद्य गोमांसभक्षणे त
प्तकृच्छ्रपरिक्लिष्टोमौंजीहोमेनशुद्ध्यति महापातककर्तारश्चत्वारोपिविशेषतः अग्निंप्रविश्यशुद्ध्यंतिस्नात्वावामहातिक्रतौ
रहस्यकरणेचैवमासमघमर्षणं अघमर्षणसूक्तंवाजपेदंतर्जलेस्थितः रजकश्चर्मकारश्चनटोबुरुडएवच ३०
कैवर्तमेदभिल्लाश्चसप्तैतेअंत्यजाः स्मृताः भुक्त्वाचैषांस्त्रियोगत्वाधनानिप्रतिगृह्यच कृच्छ्राब्दमाचरेत्ज्ञानादज्ञाना
दैंदवद्वयं मातरंगुरुपत्नींचस्वसारंदुहितृस्नुषे गत्वाचप्रविशेदग्निंनान्याशुद्धिर्विधीयते राज्ञींप्रव्रजितांधात्रींतथावर्णो
त्तमामपि कृच्छ्रद्वयंतुकुर्वीतसगोत्रामधिगम्यतु अन्यासुपितृगोत्रप्रजास्वपि परदारेषुसर्वेषुकृच्छ्रंसांतपनंचरेत् वेश्या
भिगमनेपापंव्यपोहतिद्विजातयः ३५ पीत्वासकृत्सुतस्नानमंचपंचरात्रंकुशोदकं गुरुतल्पव्रतंकेचित्केचिद्ब्रह्महणोव्रतं ३६
गोघ्नस्यशुद्धिमिच्छंतिकेचिच्चैवावकीर्णिनं दंडादूर्द्धंप्रहारेणयोहिमांविनिपातयेत् द्विगुणंगोव्रतंतस्यप्रायश्चित्तंविनिर्दि
शेत् अंगुष्ठमात्रस्थूलस्तुवाहुमात्रः प्रमाणतः आर्द्रश्चसपलाशश्चगोषुदंडः प्रकीर्तितः गवांनिपातनेचैवग

पंच॰ २

मौ वासं स्रवेयदि एकैकशश्चरेत्कृच्छ्रं यथापूर्वं तथापरः पादमुत्पन्नमात्रे तु द्वौ पादौ गात्रसंभवे ४० पादोनं कृच्छ्रमाचष्टे हत्वा गर्भ
मचेतनं अंगप्रत्यंगसंपूर्णे गर्भे चेतःसमन्विते एकैकशश्चरेत्कृच्छ्रमेष गोघ्नस्य निःकृतिः वंधे रोधने चैव योपने वा गवां तजो
संपद्यते चेन्मरणं निमित्ती न तत्र लिप्यते पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत् योपने पादहीनं स्याच्चरेत्सर्वं निपातने मूर्छि
तः पतितो वापि दंडेनाभिहतस्तथा उत्थाय यदि गच्छेत्तु सप्त पंच दश त्रिवा ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि ४५ पू
र्वव्याधिप्रदुष्टानां प्रायश्चित्तं न विद्यते काष्ठलोष्ठाश्मभिर्गावः शस्त्रैर्वा निहता यदि प्रायश्चित्तं कथं तत्र शास्त्रे शास्त्रे निग
द्यते काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्ठके तप्तकृच्छ्रं तु पाषाणे शस्त्रे त्वतिकृच्छ्रमादिशेत् औषधं स्नेहमाहारं ददतां गोब्राह्मणेषु
च दीपमाणे विपत्तिश्चेत्प्रायश्चित्तं न विद्यते तैलभेषजपाणे च भोजने चैव भक्षते निःशल्यकरणे चैव प्रायश्चित्तं न विद्यते वत्सा
नां कंठबंधेन क्रियया भेषजेन वा ५० सायं संगोपनार्थाय न दोषो रोधबंधयोः पादे चैवांगरोमाणि द्विपादे श्मश्रु केवलं त्रि
पादे तु शिखावर्ज्जं पूर्णे सर्वं समाचरेत् सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं एवं नारीकुमारीणां न स्त्रीषु वपनं स्मृतं न स्त्री
णां वपनं कार्यं न च वीरासनं स्मृतं न गोष्ठे तु निवासस्तु न गच्छंतिमनुव्रजेत् राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः कृत्वा तु
वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् ५५ द्विगुणे तु व्रते चीर्णे द्विगुणैव च दक्षिणा
द्विगुणा चेन्न दत्ता हि केशाश्च परिराक्षिताः पापं क्षीयते नेहं तु दाता च नरकं व्रजेत् अग्नैच स्मार्तैर्विहितं प्रायश्चित्तं वदंति ये ता
नृधर्मस्यपितस्तु राजा दंडेन पीडयेत् अथो न पीडयेत्तांस्तु राजा कामेन मोहितः तत्पापं शतधा भूत्वा तमेव परिसर्प्पति प्राय
श्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं त्रिंशतं गां वृषं चैकं दद्याच्चैषां च दक्षिणां कृमिभिर्व्रणसंभूतैर्म्मक्षिकाभिश्च दूषिते

श्रीराम॰ २

प्रायश्चित्तं ततः

कृच्छ्रार्द्धं सम्प्रकुर्वीत शक्त्या दद्याच्च दक्षिणां कृत्वा भोजयित्वा द्विजोत्तमान् सुवर्णमाषकं दद्यात्ततः शुद्धिर्विधीयते चाण्डालश्वपचैः
स्पृष्टे निशि स्नानं विधीयते न वसेत्तु यदा रात्रौ सद्यः स्नानेन शुद्ध्यति अथ वासं वसेत्तत्र रात्रौ ज्ञानाद्द्विजोत्तमः तदा तस्यैव तत्पा
पं शतधा परिवर्त्तते उद्गच्छन्ति च नक्षत्राण्युपरिष्टाच्च ये ग्रहाः संस्पृष्टे रश्मिभिस्तेषामुदके स्नानमाचरेत् कुर्य्यात्तज्जलव
ल्मीकमक्षिकोत्खातवर्ज्यं मृत् ६५ श्मशाने शौचशेषे च न ग्राह्याः सप्तमृत्तिकाः इष्टापूर्त्तं तु कर्त्तव्यं ब्राह्मणेन प्रयत्नतः इष्टे
न लभते स्वर्गं पूर्त्ते मोक्षं समश्नुते वित्तापेक्षं भवेदिष्टं तडागः पूर्त्तमुच्यते आरामश्च विशेषेण देवतोन्यस्तथैव च वा
पीकूपतडागादि देवतायतनानि च पतितानुद्धरेद्यस्तु स पूर्त्तफलमश्नुते सुल्लाया मूत्रं गृह्णीयात्कृष्णाया गोमयं तथा ता
म्रायाश्च पयो ग्राह्यं श्वेतया दधि चोच्यते कपिलाया घृतं ग्राह्यं महापातकनाशनं ७० सर्वतीर्थनदीतोयं कुशैर्द्रव्यं पृथक्
पृथक् आहृत्य प्रणवेनैव उत्थाप्य प्रणवेन च प्रणवेन समालोड्य प्रणवेनैव तान्पिबेत् पालाशे मध्यमे पर्णे भांडे ताम्रमयेन तथा
पिबेत्पुष्करपर्णे वा मृन्मये वापि भाजने सूतके तु समुत्पन्ने द्वितीये समुपस्थिते द्वितीये नास्ति दोषस्तु प्रथमेनैव शुद्ध्यति जातेन शुद्ध्य
ते जातं मृतेन मृतकं तथा गर्भसंस्रवणे प्राप्ते त्रीण्यहानि विधीयते रात्रिभिर्मासतुल्याभिर्गर्भस्रावाद्विशुद्ध्यति ७५ रजस्युपरते
साध्वी स्नानेन स्त्री रजस्वला स्वर्गोद्भ्रश्यते नारी विवाहात्सप्तमे पदे स्वामिगोत्रेण कर्त्तव्याः तस्याः पिंडोदकक्रिया द्विपितुः पिंडदानं स्या
त्पिंडे पिंडे द्विनामतः षण्मां देयाः त्रयः पिंडा एवं दाता न मुह्यति स्वेन भर्त्रा सह श्राद्धं माता भुंक्ते सहैवतं पितामह्यपि च स्वे
न स्वेनैव प्रपितामही वर्षे वर्षे तु कुर्वीत मातापित्रोस्तु सत्क्रियां अदैवं जयेच्छ्राद्धं पिंडमेकं तु निर्वपेत् । नित्यं नैमित्तिकं काम्यं
वृद्धिश्राद्धमथापरं ८० पार्वणं चेति विज्ञेयं श्राद्धं पंचविधं स्मृतं ग्रहोपरागसंक्रान्तौ पर्वोत्सवमहालये निर्वपेत्त्रीन्नरः

यम
३

पिंडानेकमेवमतोहनि अनूचानंपरपक्षस्यपिंडगोत्रेचसूतके पाणिग्रहणमंत्राभ्यांस्वगोत्राद्भ्रशतेततः येनयेनतुवर्णेन
याकन्यापरिणीयते तत्समंसूतकंयाति तथापिंडोदकेचसा विवाहेचैवनिर्वृत्ते चतुर्थेहनिरात्रिषु एकत्वंसागताभर्तुः
पिंडगोत्रेचसूतके आस्थिसंचयनंकार्य्यंबंधुभिर्हितबुद्धिभिः ८५ चतुर्थेपंचमेचैवसप्तमेनवमेतथा अस्थिसंचय
नंप्रोक्तंवर्णानामनुपूर्वशः एकादशाहेप्रेतस्ययस्यचोत्सृज्यतेवृषः समुच्यतेप्रेतलोकात्स्वर्गलोकंचगच्छति ८७
तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते गंगातोयेयदास्थीनिप्रक्षिप्तेशुभकर्मणि नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कथंच
न तावदस्थिमनुष्यस्यगंगातोयेषुतिष्ठति तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते नाभिमात्रेजलेस्थित्वाहृदये
नानुचिंतयेत् ८८ आगच्छंतिपितरोगृह्णंत्वेतान्जलांजलीन् हस्तौकृत्वासुसंयुक्तौपूरयित्वाजलेनतु गोशृंगमात्र
मुद्धृत्यजलमध्येविनिक्षिपेत् आकाशेतुक्षिपेद्वारिवारिस्थोदक्षिणामुखः पितृणांस्थानमाकाशंदक्षिण
तथैवच आपोदेवगणाःप्रोक्ताआपःपितृगणाःस्मृताः तस्माद्यायोजलेदेयाःपितृणांदत्तमक्षयं दिवासूर्यांशुभि
स्तप्तंरात्रौनक्षत्रमारुतैः संध्ययोरुभयोश्चैवपवित्रंसर्वदाजलं स्वभावयुक्तमप्याप्तममेध्येनसदाशुचिः ८९ भां
डस्थंधरणीस्थंवापवित्रंसर्वदाजलं देवतानांपितृणांचजलेदद्याज्जलांजलीन् असंस्कृतप्रमीतानांस्थलेदद्याज्ज
लांजलीन् श्राद्धेसवनकालेचदद्यादेकेनपाणिना उभाभ्यांतर्पणंदद्यादितिधर्मोव्यवस्थितः ९० इतियमप्रो
क्तंधर्मशास्त्रंसमाप्तं शुभमस्तु भाद्रपदमासेकृष्णपक्षेतिथौ २ भौमवासरे शंवत् १८४२ शाके १७०७ श्रीरस्तु ४

श्रीरामः